शैवोपवासव्रतं भविष्यपु० "चतुर्द्दश्यां तथाष्टम्यां पक्षयोः शुक्लकृष्णयोः। योऽब्दमेकं न भुञ्जीत शिवार्च्चनरतो नरः। यत् पुण्यमक्षयं प्रोक्तं सततं सत्रयाजिनाम्। तत् पुण्यं सकलं तस्यां शिवलोकञ्च गच्छति"।

शौर्य्यव्रतं वराहपु०"अतःपरं प्रवक्ष्यामि शौर्य्यव्रतमनुत्तमम्। येन भीरोरपि महत् शौर्य्यं भवति तत्क्षणात्। मासि चाश्वयुजे शुद्धा नवमी समुपोषिता। सप्तम्यां कृतसङ्कल्पः स्थित्वाष्टम्यां निराशनः। नवम्यां प्राशयेत् पिष्टं प्रथमं भक्तितो नृप!। ब्राह्मणान् भोजयेद्भक्त्या देवीञ्चैव तु पूजयेत्। दुर्गां देवीं महाभागां महामायां महाप्रभाम्। एवं संवत्सरं यावदुपोष्य विधिवन्नृप!। व्रतान्ते भोजयेद्धीमान् यथाशक्त्या कुमारकान्। हेमवस्त्रादिभिः स्नातान् पूजयित्वा तु शक्तितः। पश्चात् क्षमापयेत्तांस्तु देवी मे प्रीयतामिति। एवं कृत्वा भ्रष्टराज्योलभेद्राज्यं न संशयः। अविद्यो लभते विद्यां भीरुः शौर्य्यञ्च विन्दति"।

श्रद्धाव्रतं पद्मपु० "कृत्वापलेपनं शम्भोरग्रतः केशवस्य च। स सर्व्वपापनिर्म्मुक्तः शिवलोके महीयते। राजा भवति सम्भूतः सार्व्वभौमो महेश्वरः। एतत् श्रद्धाव्रतं नाम बहुकल्याणकारकम्"।

श्रवणद्वादशीव्रतं भविष्योत्तरे "एकादशी यदा शुक्ला श्रवणेन समन्विता। विजया सा तिथिः प्रोक्ता भक्तानां विजयप्रदा। एकादश्यां सोपवासो रात्रौ संपूजयेद्धरिम्। रौप्यसौवर्णपात्रे वा दारुवंशमयेऽपि वा। आच्छाद्य पात्रं वासोभिरक्षतैः पलसंमितैः। मार्गचर्म्मण गन्धैश्च भक्त्या वा शक्त्यपेक्षया। तिलाढ़केन वित्ताढ्यः प्रस्थेन कुडवेन वा। अलाभे यवगोधूमैः फलैः शुद्धतिलैर्भवेत्। पुष्पैर्गन्धैः फलैर्धूपैः कालोत्थैरर्च्चयेद्धरिम्। नानाविधैश्च नैवेद्यैर्भक्ष्यभोज्यैर्गुड़ोदनैः। स्ववित्तस्यानुसारेण वहिरर्घ्यञ्च कारयेत्। मन्त्रेण तु शतगुणं भक्त्या लक्षगुणोत्तरम्। भक्तिमन्त्रगुणोपेतं कोटिकोटिगुणोत्तरम्। एभिर्मन्त्रपदैस्तत्र पूजयेद्गरुड़ध्वजम्। उपहारैर्नरश्रेष्ठ! शुचिर्भूत्वा समाहितः"। "एषा व्युष्टिः समाख्याता एकादश्यां मया तव। पूर्व्वमेव समाख्याता द्वादशी श्रवणान्विता। उपोष्यैकादशीं पश्चाद् द्वादशीमप्युपोषयेत्। नचात्र विधिलोपः स्यादुभयोर्द्देवता हरिः"। एकादश्यां द्वादश्यां चान्यतरस्यां वा श्रवणयुक्तायां श्रवणयुक्तोपवासेनैव व्रतद्वयसिद्धिः एकस्मिन् व्रते पूर्व्वस्यां तिथिमुपोष्य पश्चादपारयित्वा नान्योपोष्या इति यो विधिलोपः स एकदेवताकत्वेन न भवतीत्यर्थः। "बुधश्रवणसंयुक्ता द्वादशी सङ्गमोदकम्। स्नानं दध्योदनं सम्यगुपवासः परो विधिः। सगरेण ककुत्स्थेन धुन्धुमारेण गाधिना। एतैश्चान्यैश्च राजेन्द्र! कामाप्तं द्वादशीव्रतम्। सा द्वादशी बुधयुता श्रवणेन सार्द्धं सा वै जयेति कथिता ऋषिभिर्नभस्ये। तामादरेण समुपोष्य नरोऽमरत्वमाप्नोति पार्थ! अणिमादिगुणोपपन्नम्"।

विष्णुधर्म्मोत्तरे "उपवासासमर्थानां किं स्यादेकमुपोषितम्। महाफलं महादेव! तन्ममाचक्ष्व पृच्छतः"। कृष्ण उवाच "या राम! श्रवणोपेता द्वादशी महती तु सा। तस्यामुपोषितः स्नातः पूजयित्वा जनार्द्दनम्। प्राप्नोत्ययत्नात् धर्म्मज्ञ! द्वादशद्वादशीफलम्। दध्योदनयुतं तस्यां जलपूर्णं घटं द्विजे। वस्त्रसंवेष्टितं दत्त्वा छत्रोपानहमेव च। न दुर्गतिमवाप्नोति जातिमग्र्याञ्च विन्दति। अक्षय्यं स्थानमाप्नोति नात्र कार्य्या विचारणा। श्रवणद्वादशीयोगे बुधवारो भवेद् यदि। अत्यन्तं महती नाम द्वादशी सा प्रकीर्त्तिता। स्नानं जप्यं तथा दानं होमः श्राद्धं सुरार्च्चनम्। सर्व्वमक्षयमाप्नोति तस्यां भृगुकुलोद्वह!। तस्मिन् दिने तथा स्नातो यत्र क्वचन सङ्गमे। स्वर्गङ्गास्नानजं राम! फलं प्राप्नोत्यसंशयम्। श्रवणे सङ्गमाः सर्व्वे परपुष्टिप्रदाः सदा। विशेषात् द्वादशीयुक्ते बुधयुक्ते विशेषतः। तथैव द्वादशी प्रोक्ता बुधश्रवणसंयुता। तृतीया च तथा प्रोक्ता सर्व्वकामफलप्रदा। तथा तृतीया धर्म्मज्ञ! तथा पञ्चदशी शुभा"।

श्रीपञ्चमीव्रतं गरुड़पु०"यदिन्द्रेण पुरा चीर्णं श्रीवियुक्तेन पार्थिव!। श्रीसमृद्धिकरं तद्धि शृणु श्रीपञ्चमीव्रतम्। मार्गशीर्षे सिते पक्षे पञ्चम्यां पन्नगोत्सवे। उपवासस्य नियमं कुर्य्यात् पद्मां करेद्धृदि। स्वर्णरौप्यां यथा शक्त्या ताम्रां मृत्काष्ठजामथ। चित्रपट्टगतां देवीं लक्ष्मीं क्ष्मापाल! कारयेत्। पद्मासनां पद्महस्तां पद्मां पद्मदलेक्षणाम्। दिग्गजेन्द्रैः स्नाप्यमानां काञ्चनैः कलशोत्तमैः"। लक्ष्मीरूपनिर्म्माणन्तु विष्णुधर्म्मोत्तरोक्तं वेदितव्यम्। तद्यथा "सुस्थिता श्रीः कर्त्तव्या पङ्कजाम्बुजकरा शुभा। सुखास्थिता महाभाग! पद्मे पद्मकरा शुभा। द्विभुजा चारुसर्व्वाङ्गी सर्व्वाभरणभूषणा। द्वौ च मूलकरौ शुभ्रौ कार्य्यौ विद्याधरौ शुभाविति। ततो